International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2022; 8(5): 23-24
© 2022 IJSR
www.anantaajournal.com
Received: 21-05-2022
Accepted: 26-06-2022

**Suman Das**
Department of Advaita Vedanta,
Shri Lal Bahadur Shastri
National Sanskrit University,
New Delhi, India

**Corresponding Author:**
**Suman Das**
Department of Advaita Vedanta,
Shri Lal Bahadur Shastri
National Sanskrit University,
New Delhi, India

# अद्वैतवेदान्तपूर्वमीमांसादर्शनयोर्मध्येप्रत्यक्षप्रमाणस्य तुलनात्मकमध्ययनम्

**Suman Das**

## प्रस्तावना

### अद्वैतवेदान्ते प्रत्यक्षलक्षणम्

भारतीयदर्शने सर्वेऽपि दार्शनिका: प्रत्यक्षप्रमाणमङ्गोकुर्वन्ति ।
प्रत्यक्षलक्षणविचारेऽस्मिन् प्रत्यक्षपदस्य त्रिषु विषयेषु प्रयोग: भवति । यथा -
१) प्रत्यक्ष्यते इति प्रत्यक्षमर्थात ज्ञानम् ।
२) प्रत्यक्ष्यते अनेनेति प्रत्यक्षम् अर्थात् प्रमाणम।
३) अक्षमक्षं प्रति वर्तते इति प्रत्यक्षमर्थात् विषयः ।

वेदान्तपरिभाषायां ज्ञानगतप्रत्यक्षत्वप्रयोजकं विषयगतप्रत्यक्षत्वप्रयोजकमाधारीकृत्य चर्चा प्रचलति । इतः पूर्वं तार्किकोक्तं इन्द्रियार्थसन्निकर्षजन्यं ज्ञान प्रत्यक्षं तदिन्द्रियजन्यत्वादिज्ञानं प्रत्यक्षत्वस्य न प्रयोजकं यतो हि ईश्वरप्रत्यक्षेऽव्याप्तं तथाऽनुमितौ अतिव्याप्तमतः वेदान्ते किं प्रत्यक्षत्वस्य प्रयोजकमिति प्रश्नः उदेति तदा समाधीयते ज्ञानगतप्रत्यक्षत्वस्य प्रयोजकमस्ति प्रमाण चैतन्यविषयचैतन्ययोरभेदस्यैव तत्प्रयोजकत्वमिति । वेदान्ते चैतन्यैकत्वात्कथमत्र चेतनस्य भेद : कथ्यते ? तत्रोत्तरं दीयते स्वरूपतश्चैतन्यस्याभैदैप्यौपाधिकभेदमादाय चैतन्यस्य भेदो वर्तते यथा अन्तकरणावच्छिन्नचैतन्यं प्रमातृचैतन्यं, अन्तकरणवृत्त्यावच्छिन्नचैतन्य प्रमाणचैतन्यं, घटाद्यवच्छिन्नचैतन्यं विषयचैतन्यमिति । अनेन प्रकारेण चैतन्यं त्रिविधं भवति ।

### कुमारिलमते प्रत्यक्षप्रमाणस्वरूपम्

"मानाधीना मैयसिद्धिः मानसिद्धिश्च लक्षणात्" इति सिद्धान्तमनुसृत्य स्वमनीषयाऽत्र समाप्तशैला भाट्टाभिमतं प्रसक्षप्रमाणमुयस्थाप्यते ।
तत्र प्रमाकरणं प्रमाणमिति प्रमाणसामान्यलक्षणम् । प्रमा च अज्ञाततत्त्वार्थज्ञानकरणमिति । करणं च व्यापारवदसाधारणकारणम् । अत्र केश्चिदुच्यते यद् अज्ञाततत्त्वार्थज्ञानं यदि प्रमा स्यात् तदा "घटोऽयम्" | इति धारावाहिकज्ञानेषु द्वितीयादीनाम् अप्रमात्तं स्यात् तेषां ज्ञानार्थविषयकत्वात् ।तेनात्र अयम् "अयम्" इति "उत्तरोत्तरेषा" कालांशानामज्ञावानामवगमात् उत्तरे क्षणे घटादिसद्भावस्य च पूर्वजानेन अनधिगतत्वात नाव्याप्तिदोषः । तत्त्वपदनिवेशेन भ्रमसंशयादीनामयथार्थज्ञानानां निराशो वेदितव्यः । तथा च अज्ञाततत्त्वावगमरुपया: प्रमायाः करणत्वेन इन्द्रियशन्निकर्षादीनां प्रमाणत्वं सिद्धम् । तानि च प्रमाणानि भाट्ट-मते षड़ सन्ति। तथा चौक्तम -

प्रत्यक्षमनुमानं च शब्दश्योपमितिस्तथा ।
अर्थापत्तिरभावश्च षट्प्रमाणानि मादृशाम् ॥

तत्र प्रत्यक्षप्रमाणस्य लक्षणमिथत्यमिह वर्णितम् " इन्द्र्यसन्निकर्षजं प्रमाणं प्रत्यक्षं कानि पुनरिन्द्रियाणि ? तत्रोच्यते चक्षूरसनप्राणस्पर्शश्रोत्राणि मनश्चेति षडिन्द्रियाणि एवमिह एभिरिन्द्रियैः तत्तत् विषयसन्निकर्षेण तत्तत्प्रत्यक्षात्मकज्ञानं समुत्पद्यते तत्तदिन्द्रियजन्यत्वात् षड्विधं वेदितव्यम् । चाक्षुष- राशन- घ्राणज- स्पार्शन - श्रौत्र- मानसश्चेति । इदानीमिन्द्रियेण सह अर्थस्य सन्निकर्षः व्यापाइरु - यो वेदितव्यः । स चात्र द्विविधः - संयोग संयुक्ततादात्म्यञ्चेति । तत्र पृथिव्यतेजशां चक्षुस्त्वगिन्दियाभ्यां संयोगादूग्रहणं ( ज्ञानं ) जायते । वायोः त्वक्संयोगात् ग्रही भवति । दिङ्नभस्तमसां दृक् संयोगात् ज्ञानं भवति । शब्दस्य श्रोत्रसंयोगात् ज्ञानं ज्ञायते आत्मनश्य मनसः संयोगादू ग्रहो भवति । कालस्य तु सर्वैरपि इद्रियैः संयोगाद् ज्ञानं भवति ।
यदा तु चक्षुरादिसंयुक्तेषु पूर्वोक्तेषु पृथिव्यादिषु तदात्मभूतानां जातिगुणकर्मणां ग्रहणं जायते तदा संयुक्ततादात्म्यसैन्निकर्षो वोध्यः । तथा चोक्तं-

रुपादीनां तु संयुक्तद्रव्यतादात्म्यमेव नः ।
प्रतीतिकारणं तस्मान्न सम्वन्धान्तरस्पृहा "

यदा तु जातिगुणकर्मगतानां सत्तारूपत्वं कर्मत्वादीनां ग्रहणं तदा तेषामेव परम्परया तादात्म्यं विज्ञेयम् ।
अतः एतेषां ग्रहे (ज्ञाने) संयुक्ततादात्म्यमेव सन्निकर्षो ग्राहयः । तद्थिम् उपर्युक्तद्विविधसन्निकर्षेण चक्षुरादि इन्द्रियमाध्यमेन तत्तदर्थे विषयिणी प्रमा जायते एवमिह संक्षेपेण भाट्टमने प्रसक्षप्रमाणस्वरूपं विवेधितमिति [1]

## सन्दर्भ


1. अद्वैतसिद्धिः, बालबोधिनीव्याख्यासहिता, योगेन्द्रनाथदेवेन्द्रशर्मा, तारापबलिकेशन्स चैत्रे, 2006
2. अद्वैतदीपिका, नृसिंहाश्रमस्वामिनः, सम्पूर्णानन्दसंस्कृत विश्वविद्यालयः, वाराणसी, 1984
3. आगमप्रमाणम् यमुनाचार्यः ओरियन्टल इन्स्टिटयुट् बडौदा, 1976
4. ईशादिदशोपनिषदः मोतीलालबनारसीदासः, प्रथमसंस्करणम्, देहली 2002
5. उपनिषत्संग्रहः पं. जगदीशशास्त्री, मोतीलालबनारसीदासः, पुनमुद्रितसंस्करणम् नवदेहली, 1998
6. छान्दोग्योपनिषदः, शाङ्करभाष्यम्, मोतीलालबनारसीदासः, वाराणसी, 1978
7. ब्रह्मसूत्रशाङ्करभाष्यम् (सत्यानन्दीटीका) सत्यानन्दसरस्वती गोविन्दमठ वाराणसी, 1992
8. ब्रह्मसूत्रशाङ्करभाष्यम् (भामती) वाचस्पतिमिश्रः चौखम्बा विद्याभवन, 2014
9. ब्रह्मसूत्रशाङ्करभाष्यम्, श्रीशङ्करग्रन्थावली, मोतीलालबनारसीदास : 2015
10. ब्रह्मसिद्धिः आचार्यमण्डनमिश्रा सम्पादकः प्रो.केदारनाथ त्रिपाठी, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली. 1999
11. ब्रह्मविद्याभरणम् श्रीमद्वैतानन्दस्वामिनः, संस्कृत एजुकेशन सोसइटी, मद्रास, 1976
12. बृहदारण्यकोपनिषद्,गीताप्रेस गोरखपुरम् पुनर्मुद्रितसंस्करणम्
13. वेदान्तपरिभाषा, डॉ श्रीगजाननशास्त्रीमुसलगांवकरः, सम्पादक: श्रीराशास्त्रीमुसलगांवकर, चौखम्बा विद्याभवन, वाराणसी, 1983
14. जैमिनीयन्यायमाला, माधवाचार्यः, सम्पादकः कमलकान्त त्रिपाठी, चौखम्बा विद्याभवनम्, वाराणासी, 2013 भटचिन्तामणि (तर्कपादः) विश्वेश्वरभटटः सुर्यनारायण शुक्ल, चौखम्बासंस्कृतसीरीज आफिस, वाराणासी
15. मीमांसादर्शनम् (तर्कपादः) हिन्दीव्यायासहितम्, व्याख्याकार: - डॉ. उमाशङ्कर शर्मा ऋषि, चौखम्बासूरभारती प्रकाशन वाराणसी, 2008
16. मीमांसान्यायप्रकाश -विमर्श. डॉ. कपिलदेव पाण्डेय, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, 2001
17. मीमांसाकौस्तुभः खण्डदेवः, चौखम्बासंस्कृतसीरीज आफिस, वाराणसी, 1991